दिनांक 1-7-20

# उपशास्त्री द्वितीय वर्ष

## द्वितीय अध्याय

### महीधर भाष्य

### दर्शपूर्णमास मन्त्राः

मन्त्रः →

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ।।

व्याख्या →

हे इध्म, त्वं कृष्णोऽसि कृष्णमृगरूपो यज्ञोऽसि । इध्मपूलकस्य यज्ञसाधनत्वाद्यज्ञत्वोपचारः । किंभूतः । आखरेष्ठः । आ समन्तात् खरे कठिने वृक्षे तिष्ठतीति आखरेष्ठः । यद्वा खं स्वर्गं राति ददातीति खरः आहवनीयस्तत्रा समन्तात् तिष्ठतीत्याखरेष्ठः । अन्तोदात्तः कृष्णशब्दो वर्णवाची, अयं तु कृष्ण शब्द आद्युदात्तत्वान्मृगवाची । यज्ञः कदाचिद्देवेभ्योऽपक्रान्तः स्वगोपनाय कृष्णमृगो भूत्वा वने यज्ञियतरुमध्ये प्रविश्य कुत्र चित्कठिने वृक्षे तस्थौ । तदेतदभिप्रेत्य कृष्ण आखरेष्ठ इति ह्ययमुच्यते । यतो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार इत्यादि श्रुतेः । 'स्थे च भाषायाम्' इति स्थे परपदे भाषायां सप्तम्या अलुग्विधे धातोरेऽलुक् । 'पूर्वपदात्' इति षत्वम् । अतोऽग्नये जुष्टं प्रियं त्वां प्रोक्षामि । शुद्धये जलेनेति शेषः । वेदिरसीति वेदिं प्रोक्षति । त्वं वेदिरसि

विद्यते लभ्यते इति वेदिः। "विद्लृ लाभे"। देवैर
सुरेभ्यो लब्धत्वात् वेदिः। अतः बर्हिर्जुष्टं बर्हिषो
धारणोपयोगितया प्रियां त्वां प्रोक्षामि। पृथ्वीरूपाया
वेदेः प्रजारूपस्य बर्हिषो धारकत्वं युक्तम्।
बर्हिरसीति बर्हिः प्रोक्षणम्। हे दर्भ, त्वं बर्हिरसि
प्रभूतत्वाद्वेदिबृंहण समर्थमसि। अतः स्रुग्भ्यो जुष्टं
स्रुच्यां धारणात्प्रियं त्वां प्रोक्षामि॥